संस्कृत-वार्ता:

11.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र मोदी अकथयत् यत् भारतचीनयोर्मध्ये स्थायि-शान्तिपूर्ण-सम्बन्ध: न केवलं उभाभ्यां देशयो: अपितु समग्र-विश्वाय महत्वपूर्णमस्ति।
- भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी प्रोक्तवान् यत् विगत-दश वर्षेषु एन.डी.ए. संयुक्तदलेन अशेषराष्ट्राय सुदृढता प्रदत्ता।
- लोकसभा-निर्वाचनानां तृतीय-चरणाय अधिसूचना श्व: सम्प्रसारयिष्यते।
- जम्मू-कश्मीरे पुलवामा-जनपदेऽद्य सुरक्षाबलैस्सह सञ्जाते संघर्षे आतंकवादी एक: मृतो जात:।
- अशेष-देशेऽद्य ईद-उल-फित्र पारम्परिकरीत्या आमान्यते।
- आई-पी-एल् इत्यस्यां क्रिकेट-स्पर्धायां अद्य सायं मुम्बय्या: वानखेडे-क्रिकेट-क्रीडांगणे मुम्बई इण्डियन्सदलं रॉयल-चैलेन्जर्स-बेंगलुरू-दलेन सह स्पर्धिष्यते।

<u>प्रधानमन्त्री-चीनदेश:</u>

प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रत्यपादयत् यत् भारत-चीन-देशयो: मध्ये विषम-सम्बन्धान् दूरीकर्तुम् उभयो: देशयो: सीम-प्रसङ्गानां तात्कालिक समाधानम् आवश्यकम् अस्ति। श्रीमोदी अकथयत् यत् भारतचीनयोर्मध्ये स्थायि-शान्तिपूर्ण-सम्बन्ध न केवलं उभाभ्यां देशयो: अपितु समग्र-विश्वाय महत्वपूर्णमस्ति। एकस्मिन् साक्षात्कारे प्रधानमन्त्रिणा आशा अभिव्यक्ता यत् राजनयिक-सैन्य-स्तरयो: सकारात्मक-रचनात्मक-वार्तयो: माध्यमेन उभौ देशौ सीम्नि शान्ति-स्थायित्वं च स्थापयितुं समर्था: भविष्यत:। श्रीमोदी भारतीय-लोकतन्त्र-विषयेऽपि उक्तवान् यत् मतदातृणां नैरन्तर्येण प्रवर्धमानं सहभागित्वं लोकतन्त्रं प्रति जनानां विश्वासस्य प्रमाणमस्ति। विश्वस्य बृहत्तमस्य लोकतन्त्रस्य रूपेण वर्षे नवदशाधिक-द्विसहस्रतमे सामान्यनिर्वाचने षष्टि: कोटि: अधिक-जना: मतदानं कृतवन्त:। साम्प्रतं यावत् अस्य वर्षस्य सामान्यनिर्वाचने देशस्य सप्तनवति-कोट्यधिका: मतदातार: स्वीय-मताधिकारस्य उपयोगं करिष्यन्ति। एतदर्थं आदेशे दशलक्षाधिकानि मतदानकेन्द्राणि अपि निर्मीयन्ते।

## प्रधानमन्त्री-उतराखण्ड-जनसभा

प्रधानमन्त्री श्री नरेन्द्रमोदी राजस्थान-राज्ये करौली-क्षेत्रे जनसभां एकां सम्बोधयति। इत: प्राक् श्रीमोदिना ऋषिकेश-उत्तराखण्डे अपि जनसभा: सम्बोधिता:, प्रोक्तञ्च यत् विगत-दश वर्षेषु भारतीय-जनतान्त्रिक संयुत्या अशेष राष्ट्रं सुदृढता प्रदत्ता। तेन एतदपि प्रोक्तं यत् यदा देशे निर्बल-प्रशासनेन शासनं कृतम्, तदा आतंकिनां सशक्तता सुदृढा जाता। प्रधामन्त्रिणा भणितं यत् तदीय प्रशासनेन वन-रेंक-वन-पेंशन इति नामधेया योजना सैनिकेभ्य: प्रारब्धा। तेन प्रोक्तं यत् भारतीय-जनता-पार्टीति दलेन स्वदेशे निर्मितं जीवन रक्षक बाहु वस्त्रं अपि सैनिकेभ्य: प्रदत्तम्। श्रीमोदिना प्रतिपादितं यत् प्रशासनेन विभिन्नै: कार्यक्रमै: उत्तराखण्डस्य अर्थव्यवस्थां सुदृढी कृता।

## तृतीय-निर्वाचनाधिसूचना

लोकसभा-निर्वाचनानां तृतीय-चरणाय अधिसूचना श्व: सम्प्रसारयिष्यते। चरणेऽस्मिन् दश-राज्यानां, द्वि-केन्द्र शासित-प्रदेशयो:, चतुर्णनवति-लोकसभा-आसनानाङ्कृते मे-मासे सप्तमे दिनांके मतदानं भविष्यति। मध्य-प्रदेशस्य बेतुल-निर्वाचनस्य अधिसूचनापि श्व: एव प्रसारस्यति। अस्मिन् संसदीय-निर्वाचन-क्षेत्रे द्वितीय-चरणे मतदानं भवितुं इति निश्चितम्, परं बहुजन-समाजवादी-पार्टीति दलस्य प्रत्याशिन: निधनात् निर्वाचन-प्रक्रिया स्थगिता जाता। चरणेऽस्मिन् ऊनविंशति: तारिकां यावत् नामांकनं प्रपूरयिष्यति।

## पुलवामा-संघर्ष:

जम्मू-कश्मीरे पुलवामा जनपदेऽद्य सुरक्षाबलैस्सह सञ्जाते संघर्षे आतंकवादी एक: मृतो जात:। आरक्षि-दलेन संसूचितं यत् सुरक्षाबलै: आतंकिनां उपस्थितिं प्राप्य राजपोरा-क्षेत्रे फ्रास्सीपो ग्रामे अन्वीक्षणं प्रारब्धम्। आतंकिनां गोलिकाप्रहाराणां सुरक्षा-बलै: भद्रं प्रत्युत्तरं प्रदत्तम्। मृतक-आतंकि-जनस्य अभिज्ञानं सञ्जायते। आरक्षि-जनेन विज्ञापितं यत् घटनास्थलात् बृहन्मात्रिक-आयुध-सामग्री अधिगतास्ति।

## ईद-उल-फित्र

अशेष-देशेऽद्य ईद-उल-फित्र पारम्परिकरीत्या आमान्यते। जनै: ईदगाह-मस्जिद-तीर्थ-स्थलेषु नमाज-प्रार्थिता। अवसरेऽस्मिन् द्रौपदी-मुर्मु-वर्यया देशवासिन: ईद-उल-फित्र-जनजातीय-समुदायस्य पर्व सरहुल-इत्यस्य शुभकामना: प्रसारिता:। श्रीमत्या मुर्मुवर्यया सामाजिक-अन्तर्जालीय-सन्देशं भणितं यत् ईद-पर्व-परस्पर-हर्ष-वितरण-पर्व-विद्यते। पर्व-इदं एकता-सद्भाव-सौहार्द-भावनां विवर्धयति। तया भणितं यत् सरहुल-पर्व-नववर्ष-आगमनस्य प्रतीको

विद्यते। प्रकृति-प्रेम-सम्मानस्य च संदेश: प्रदीयते। एतेन सहैव उपराष्ट्रपतिना, प्रधानमन्त्रिणा अपि देशवासिन: शुभासिता:।

## मिजोरम-जेडएमसी

भारतीय-जनता-पार्टीति दलेन मिजोरम-प्रदेशे जोराम-मेडिकल-कॉलेज-इत्यस्मै क्षेत्रीय-चिकित्सा-विज्ञान-संस्थानस्य स्थानं प्रदत्तम्। भारतीय-जनता-पार्टीति दलस्य वरिष्ठ-नेत्रा, मन्त्रिणा च डॉ. एस. जयशंकरेण लोकसभा-निर्वाचनात् प्राक् मिजोरम-प्रदेशाय-दलस्य-विवरणं सम्प्रसारयता भणितं यत् निर्वाचनमिदं न केवलं पञ्च वर्षाय वरन् आगामि पञ्चविंशति-वर्षाणां देशस्य प्रगति-यात्रां प्रशस्यते।

## भाजपादलं-समाविष्टम्

गुजरातस्य पूर्व-कांग्रेस नेता रोहनगुप्ता पूर्व-युव-कांग्रेस-नेता डॉ. जहांजेब-सिरवाल: भूतपूर्व आई. ए. एस्. अधिकारी परमपाल कौर: तस्य च पति गुरप्रीत-सिंह-मलूका च अद्य नवदिल्लयां भाजपेतिदलमुख्यालये भाजपादलस्य महासचिवस्य विनोद-तावडे इत्येतस्य दलनेतु: हरदीपपुर्या: च उपस्थितौ भाजपादले समाविष्टवन्त:।

## हरियाणा-दुर्घटना

हरियाणाया: महेन्द्रगढ जनपदे अद्य विद्यालयीय-बस वाहनस्य अत्यधिक-वर्तनेन अष्ट बाला: मृता: जाता: अनेके च व्रणिता: जाता:। दुर्घटनेयं उन्हानी ग्रामं निकषा घटिता। आरक्षि: कथितवान् यत् बसचालक: निगडित:। हरियाणाया: शिक्षामन्त्री सीमा-त्रिखा महेन्द्रगढस्थितं चिकित्सालयं प्रति गतवती यत्र द्वादश-बाला: उपचाररता: सन्ति। राष्ट्रपति: द्रौपदीमुर्मु: इमां बसयानदुर्घटनां अभिलक्ष्य स्वीयसंवेदना: प्रकटितवती। एकस्मिन् सामाजिक सन्देशे राष्ट्रपति: अवोचत् यत् एतस्यां विद्यालयीय-बसयानदुर्घटनायां निर्दोष-बालानां मृत्यु: हृदयविदारको विद्यते।

## प्रधानमन्त्री-हरियाणा बसदुर्घटना

प्रधानमंत्री नरेन्द्रमोदी अद्य हरियाणाया: महेन्द्रगढजनपदे जातायां बसयानदुर्घटनायां मृतबालानां परिवारेभ्य: स्वीयसंवेदना: प्रकटितवान्। सामाजिकसन्देश पटले श्रीमोदी व्रणितबालानां शीघ्रातिशीघ्रं स्वास्थ्याय कामना: कृतवान्। असौ अग्रे अकथयत् यत् राज्यप्रशासनस्य सन्निधौ स्थानीय-प्राशासनिकगणा: प्रभावितेभ्य: बालेभ्य: सर्वसम्भवप्रयासान् विदधाति।

भारतर्तु-विज्ञान-विभाग

भारतर्तु-विज्ञान-विभागेन महाराष्ट्र-मध्य प्रदेशयो: भागेभ्य: नारङ्गवार्णिकी संचेतना प्रख्यापिता आगामिनं दिनत्रयं यावत् मध्य प्रदेश-छत्तीसगढ-मध्यमहाराष्ट्राणां केषुचित् भागेषु पंचाशत्-किलोमीटरात्मकवेगेन सह धूलिपरिपूर्ण वायुना विद्युद्ध्वनिना सह मध्य वृष्टि: भविष्यति। विभागेन इदमपि प्रख्यापितं यत् अस्य मासस्य त्रयोदशदिनांकं यावत् पश्चिम-बंङ्गाल-झारखण्ड-ओडिशा-बिहार-अण्डमान निकोबार क्षेत्रेष्वपि विद्युत्प्रकाशेन सह मध्यमवृष्ट्या: अनुमानो वर्तते। तत्रैव राजस्थानराज्ये एतादृशी स्थिति: पञ्चदशदिनांक यावत् भविष्यति। ऋतु विभागेन पूर्वानुमानितं यत् जम्मू-कश्मीर-हिमाचलप्रदेश-उत्तराखण्डराज्येषु श्व: वृष्टि: हिमपातश्च भविष्यति।

आई-पी-एल्

आई-पी-एल् इत्यस्यां क्रिकेट-स्पर्धायां अद्य सायं मुम्बय्या: वानखेडे क्रिकेट-क्रीडांगणे मुम्बई इण्डियन्सदलं रॉयल-चैलेन्जर्स-बेंगलुरू-दलेन सह स्पर्धिष्यते। यस्या: प्रसारणं सायं सार्ध सप्तवादनतो भविष्यति। ह्य: रात्रौ जयपुरस्य सवाई-मानसिंह-क्रीडांगणे गुजरात-टाइटन्स दलं राजस्थान रॉयल्य दलं त्रिभि: स्तोभै: पराजितम्।

।। इति वार्ता: ।।